# ॥ શ્રીમહાગણપતિમૂલમન્ત્રપદમાલાસ્તોત્રમ્ ॥

..
shrImahAgaNapatimUlamantrapadamAlAstotram
..

sanskritdocuments.org

August 20, 2017

# .. shrImahAgaNapatimUlamantrapadamAlAstotram ..

# ॥ શ્રીમહાગણપતિમૂલમન્ત્રપદમાલાસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : mahAgaNapatimUlamantrapadamAlAstotram

File name : mahAgaNapatimUlamantrapadamAlAstotram.itx

Category : mAlAmantra, ganesha

Location : doc_ganesha

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : anonymous456an at gmail.com

Proofread by : anonymous456an at gmail.com

Latest update : June 16, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીમહાગણપતિમૂલમન્ત્રપદમાલાસ્તોત્રમ્ ॥

॥ મૂલમન્ત્રમ્ ॥

॥ ૐ હ્રીં શ્રીં ક્લીં ગ્લૌં ગં ગણપતયે વરવરદ
સર્વજનં મે વશમાનય સ્વાહા ॥

The following stotram is a very powerful Hymn to Lord Ganesha in which the first letters/word of each verse corresponds to the letter/word of the Moolamantram. This Stotram is composed by Shri C V Swami Shastri AKA Shri Anantaananda Naatha, who devotes it to His GuruDeva Shri Chidaananda Naatha. He has announced that the merits of reading and chanting this Stotram are equivalent to chanting the Moolamantram.

॥ અથ સ્તોત્રમ્ ॥

ૐઇત્યેતદજસ્ય કણ્ઠવિવરં ભિત્વા બહિર્નિર્ગતં
હ્યોમિત્યેવ સમસ્તકર્મ ઋષિભિઃ પ્રારભ્યતે માનુષૈઃ ।
ઓમિત્યેવ સદા જપન્તિ યતયઃ સ્વાતમૈકનિષ્ઠાઃ પરં
હ્યોઙ્કારાકૃતિવક્ત્રમિન્દુનિટિલં વિઘ્નેશ્વરં ભવાયે ॥ ૧॥

શ્રીમ્બીજં શ્રમદુઃખજન્મમરણવ્યાધ્યાધિભીનાશકં
મૃત્યુક્રોધનશાન્તિબિન્દુવિલસદ્વર્ણાકૃતિશ્રીપ્રદમ્ ।
સ્વાન્તઃસ્વાત્મશરસ્ય લક્ષ્યમજરસ્વાત્માવબોધપ્રદં
શ્રીશ્રીનાયકસેવિતે ભવદનપ્રેમાસ્પદં ભાવયે ॥ ૨॥

હ્રીમ્બીજં હૃદયત્રિકોણવિલસન્મધ્યાસનસ્થં સદા
ચાકાશાનલવામલોચનનિશાનાથાર્ધવર્ણાત્મકમ્ ।
માયાકાર્યજગત્પ્રકાશકમુમારૂપં સ્વશક્તિપ્રદં
માયાતીતપદપ્રદં હૃદિ ભજે લોકેશ્વરારાધિતમ્ ॥ ૩॥

ક્લીમ્બીજં કલિધાતુવત્કલયતાં સર્વેષ્ટદં દેહિનાં
ધાતૃક્ષ્માયુતશાન્તિબિન્દુવિલસદ્વર્ણાત્મકં કામદમ્ ।
શ્રીકૃષ્ણપ્રિયમિન્દિરાસુતમનઃપ્રીત્યેકહેતું પરં
હૃત્પદ્મે કલયે સદા કલિહરં કાલારિપુત્રપ્રિયમ્ ॥ ૪॥

ગ્લૌમ્બીજં ગુણરૂપનિર્ગુણપરબ્રહ્માદિશક્તેર્મહા-
હઙ્કારાકૃતિદણ્ડિનીપ્રિયમજશ્રીનાથરુદ્રેષ્ટદમ્ ।
સર્વાકર્ષિણિદેવરાજભુવનાર્ણેન્દ્વાત્મકં શ્રીકરં
ચિત્તે વિઘ્નનિવારણાય ગિરિજજાતપ્રિયં ભાવયે ॥ ૫॥

ગઙ્ગાસુતં ગન્ધમુખોપચારપ્રિયં ખગારોહણભાગિનેયમ્ ।
ગઙ્ગાસુતાદ્યં વરગન્ધતત્ત્વમૂલામ્બુજસ્થં હૃદિ ભાવયેઽહમ્ ॥ ૬॥

ગણપતયે વરગુણનિધયે સુરગણપતયે નતજનતતયે ।
મણિગણભૂષિતચરણયુગાશ્રિતમલહરણે ચણ તે નમઃ ॥ ૭॥

વરાભયે મોદકમેકદન્તં કરામ્બુજાતૈઃ સતતં ધરન્તમ્ ।
વરાઙ્ગચન્દ્રં પરભક્તિસાન્દ્રૈર્જનૈર્ભજન્તં કલયે સદાઽન્તઃ ॥ ૮॥

વરદ નતજનાનાં સન્તતં વક્રતુણ્ડ
સ્વરમયનિજગાત્ર સ્વાત્મબોધૈકહેતો ।
કરલસદમૃતામ્ભોપૂર્ણપત્રાઢ્ય મહ્યં
ગરગલસુત શીઘ્રં દેહિ મદ્બોધમીડ્યમ્ ॥ ૯॥

સર્વજનં પરિપાલય શર્વજ
પર્વસુધાકરગર્વહર ।
પર્વતનાથસુતાસુત પાલય
ખર્વં મા કુરુ દીનમિમમ્ ॥ ૧૦ ॥

મેદોઽસ્થિમાંસરુધિરાન્ત્રમયે શરીરે
મેદિન્યબગ્નિમરુદમ્બરલાસ્યમાને ।
મે દારુણં મદમુખાદ્યમુમાજ હૃત્વા
મેધાહ્વયાસનવરે વસ દન્તિવક્ત્ર ॥ ૧૧॥

વશં કુરુ ત્વં શિવજાત માં તે વશીકૃતાશેષસમસ્તલોક ।
વસાર્ણસંશોભિતમૂલપદ્મલસચ્છ્રિયાઽલિઙ્ગતવારણાસ્ય ॥ ૧૨॥

આનયાશુપદવારિજાન્તિકં માં નયાદિગુણવર્જિતં તવ ।
હાનિહીનપદજામૃતસ્ય તે પાનયોગ્યમિભવક્ત્ર માં કુરુ ॥ ૧૩॥

સ્વાહાસ્વરૂપેણ વિરાજસે ત્વં સુધાશનાનાં પ્રિયકર્મણીડ્યમ્ ।

સ્વધાસ્વરૂપેણ તુ પિત્ર્યકર્મણ્યુમાસુતેજ્યામયવિશ્વમૂર્તે ॥ ૧૪॥

અષ્ટાવિંશતિવર્ણપત્રલસિતં હારં ગણેશપ્રિયં
કષ્ટાઽનિષ્ટહરં ચતુર્દશપદૈઃ પુષ્પૈર્મનોહારકમ્ ।
તુષ્ટ્યાદિપ્રદસદ્ગુરૂત્તમપદામ્ભોજે ચિદાનન્દદં
શિષ્ટેષ્ટોઽહમનન્તસૂત્રહૃદયાઽઽબદ્ધં સુભક્ત્યાઽર્પયે ॥ ૧૫॥

॥ ઇતિ શ્રીઅનન્તાનન્દકૃતં શ્રીગુરુચિદાનન્દનાથસમર્પિતં
શ્રીમહાગણપતિમૂલમન્ત્રમાલાસ્તોત્રમ્ ॥

Notes
નિટિલં = મસ્તક, ભીનાશકં = ભયનાશક, ક્ષ્મા = પૃથ્વી,
ગિરિજાજાત = ગિરિજા સ્વારા ઉત્પન્ન, ઉદ્ભૂત,
નતજનતતયે = ભક્તોં કે રક્ષક,
મલહરણેચણ = પાપોં કો નષ્ટ જરને હેતુ પ્રસિદ્ધ
ગરગલસૂત = વિષ કો નિગલનેવાલે ભગવાન્ શઙ્કર કે પુત્ર
દેહિ મદ્બોધમીડ્યમ્ = મુઝે પ્રશંસનીય જ્ઞાન પ્રદાન કરેં
શર્વજ = શિવપુત્ર, પર્વતનાથસુતાસુત = હિમાલ કી પુત્રી પાર્વતી કે પુત્ર
from shrImahAgaNapatisAdhanA

Encoded and proofread by anonymous456an at gmail.com

.. shrImahAgaNapatimUlamantrapadamAlAstotram ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*